Subrahmanya Ashtottara Shatanama Stotram

सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रम्

NityaPaath
nityapaath.com/subrahmanya-108-names/

SHLOKA · श्लोकः

1 स्कंदो गुहः षण्मुखश्च भालनेत्रसुतः प्रभुः ।
पिङ्गलः कृत्तिकासूनुः शिखिवाहो द्विषड्भुजः ॥

2 द्विषड्नेत्रः शक्तिधरः पिशिताशप्रभञ्जनः ।
तारकासुरसंहारी रक्षोबलविमर्दनः ॥

3 मत्तः प्रमत्त उन्मत्तः सुरसैन्यसुरक्षकः ।
देवसेनापतिः प्राज्ञः कृपालुर्भक्तवत्सलः ॥

4 उमासुतः शक्तिधरः कुमारः क्रौञ्चदारणः ।
सेनानीरग्निजन्मा च विशाखः शङ्करात्मजः ॥

5 शिवस्वामी गणस्वामी सर्वस्वामी सनातनः ।
अनंतशक्तिरक्षोभ्यः पार्वतीप्रियनंदनः ॥

6 गङ्गासुतः शरोद्भूत आहूतः पावकात्मजः ।
जृम्भः प्रजृम्भ उज्जृम्भः कमलासनसंस्तुतः ॥

7 एकवर्णो द्विवर्णश्च त्रिवर्णः सुमनोहरः ।
चतुर्वर्णः पञ्चवर्णः प्रजापतिरहर्पतिः ॥

8 अग्निगर्भः शमीगर्भो विश्वरेताः सुरारिहा ।
हरिद्वर्णः शुभकरो बटुश्च पटुवेषभृत् ॥

9 पूषा गभस्तिर्गहनश्चंद्रवर्णः कलाधरः ।
मायाधरो महामायी कैवल्यः शङ्करात्मजः ॥

10 विश्वयोनिरमेयात्मा तेजोनिधिरनामयः ।
परमेष्ठी परब्रह्मा वेदगर्भो विराट्सुतः ॥

11 पुलिंदकन्याभर्ता च महासारस्वतावृतः ।
आश्रिताखिलदाता च रोगघ्नो रोगनाशनः ॥

12 अनंतमूर्तिरानंदः शिखंडिकृतकेतनः ।
डम्भः परमडम्भश्च महाडम्भो वृषाकपिः ॥

13 कारणोत्पत्तिदेहश्च कारणातीतविग्रहः ।
अनीश्वरोऽमृतः प्राणः प्राणायामपरायणः ॥

14 विरुद्धहंता वीरघ्नो रक्तश्यामगलोऽपि च ।
सुब्रह्मण्यो गुहः प्रीतो ब्राह्मण्यो ब्राह्मणप्रियः ॥
वंशवृद्धिकरो वेदवेद्योऽक्षयफलप्रदः ॥

Text checked against: Brihat Stotra Ratnakara, Part 2, ed. Narayan Ram Acharya Kavyatirtha, Nirnaya Sagar Press, Bombay (no. 407 सुब्रह्मण्याष्टोत्तरशतनामस्तोत्रम्).
Meanings, audio and all scripts at nityapaath.com/subrahmanya-108-names/